## एकविंशः पाठः

# सूक्तयः

सु-उक्तिः सूक्तिः भवति। अनुभवपूर्णं हितकारिवचनम् एव सूक्तिः। सूक्तयः मानवानां स्वभावं शोधयन्ति, सन्मार्गं दिशन्ति, आचारम् उपदिशन्ति च। अतः शिक्षणेऽपि बालानां कृते सूक्तयः महत्त्वपूर्णाः सन्ति। अत्र विभिन्नेभ्यः ग्रन्थेभ्यः सूक्तयः सङ्कलिताः।

1. शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति।
2. क्षणे-क्षणे यन्नवतामुपैति तदेवरूपं रमणीयतायाः।
3. बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
4. आत्मनः प्रतिकूलानि परेषां न समाचरेत्।
5. सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
6. मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्।
7. न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।
8. सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः।
9. गुणेषु हि कर्त्तव्यः प्रयत्नः पुरुषैः सदा।
10. सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्।
11. तेजसां हि न वयः समीक्ष्यते।
12. सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति।
13. तीर्थोदकं च वह्निश्च नाऽन्यतः शुद्धिमर्हतः।
14. सत्कारो हि नाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयति।
15. प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।
16. कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।
17. सेवाधर्मः परमगहनो योगिनामप्यगम्यः।

## शब्दार्थः

| | | | |
|---|---|---|---|
| एति | – | आगच्छति | (आता है) |
| उपैति | – | समीपमागच्छति | (निकट आता है) |
| समाचरेत् | – | सम्यक् प्रकारेण आचरेत् | (अच्छे प्रकार से आचरण करें) |
| परेषाम् | – | अन्येषाम् | (दूसरों का) |
| विदधीत | – | कुर्यात् | (करे) |
| गणयति | – | गणनां करोति | (गिनता है) |
| प्रविचलन्ति | – | प्रकर्षेण विचलन्ति | (विचलित होते हैं) |
| सन्देहपदेषु | – | शङ्कास्पदेषु | (शङ्कित स्थानों पर) |
| दुर्लभम् | – | कठिनम् | (कठिनाई से उपलब्ध होने वाला) |
| समीक्ष्यते | – | समीक्षां करोति | (समीक्षा करता है) |
| सद्भिः | – | सज्जनैः सह | (सज्जनों के साथ) |
| पुण्येन | – | पवित्रकार्येण | (पुण्य कार्यों के द्वारा) |
| शुद्धिमर्हतः | – | शुचितामर्हतः | (पवित्रता के योग्य) |
| अनुभूय | – | अनुभूतं कृत्वा | (अनुभव करके) |
| प्रीतिमुत्पादयति | – | प्रेमभावम् प्रकटयति | (प्रेमभाव उत्पन्न करता है) |
| उपजायते | – | उत्पन्नं भवति | (उत्पन्न होता है) |
| अगम्यः | – | दुर्लभः | (पहुँच से दूर) |

## अभ्यासः

1. **एकपदेन उत्तरत –**

(क) के न्याय्यात्पथः न प्रविचलन्ति?

(ख) केषां न वयः समीक्ष्यते?

(ग) कानि परेषां न समाचरेत्?

(घ) क्षणे-क्षणे यन्नवताम् उपैति तत् कस्याः रूपम्?

(ङ) कः योगिनाम् अपि अगम्यः?

(च) कः दुःखं सुखं च न गणयति?

**2. एकवाक्येन उत्तरत्-**

(क) रमणीयतायाः स्वरूपं किम्?

(ख) सङ्कल्पात् किम् उपजायते?

(ग) पुण्येन किं भवति?

(घ) पुरुषैः सदा केषु प्रयत्नः करणीयः।

(ङ) केषु वस्तुषु सतां अन्तःकरणप्रवृत्तयः प्रमाणम्?

**3. रिक्तस्थानानि पूरयत-**

(क) कुपुत्रो जायेत क्वचिदपि............न भवति।

(ख) सुलभा रम्यता लोके..........हि गुणार्जनम्।

(ग) ..........च वह्निश्च नाऽन्यतः शुद्धिमर्हतः।

(घ) प्रद्वेषो बहुमानो वा..............।

(ङ) सहसा विदधीत न...............परमापदां पदम्।

**4. उचितपदमेलनं कुरुत -**

| | (अ) | (ब) |
|---|---|---|
| (क) | सतां सद्भिः सङ्गः | दुर्लभं हि गुणार्जनम्। |
| (ख) | आत्मनः प्रतिकूलानि | प्रतीष्टः प्रीतिमुत्पादयति। |
| (ग) | सुलभा रम्यता लोके | कथमपि हि पुण्येन भवति। |
| (घ) | सत्कारो हि नाम सत्कारेण | परेषां न समाचरेत्। |

**5. संस्कृतवाक्येषु प्रयोगं कुरुत-**

(क) हि (ख) बुद्धिम् (ग) परम् (घ) सताम्

(ङ) समाचरेत् (च) कथम् (छ) सहसा।

**6. अधोलिखितानां पदानां विलोमपदानि लिखत-**

(क) दुर्लभम् - (ख) दुःखम् - (ग) सुपुत्रः - (घ) अनुकूलानि -

(ङ) पुण्येन- (च) शुद्धम् - (छ) न्यायम् -

7. **नामनिर्देशपूर्वकं सन्धिविच्छेदं कुरुत-**

(क) तदेव (ख) कथमपि (ग) तीर्थोदकम् (घ) गुणार्जनम्

(ङ) उपैति

8. **अत्र 'पठ्' धातोः लृट्लकारस्य रूपाणि प्रदीयन्ते, तदनुसारम् अधोलिखितानाम् अन्येषां धातूनां रूपाणि अपि लिखत -**

**'पठ्' धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

(क) गम् (ख) लिख् (ग) हस् (घ) भू

9. **रेखाङ्कितपदम् आधृत्य प्रश्नानां निर्माणं कुरुत-**

(क) आत्मनः प्रतिकूलानि <u>परेषां</u> न समाचरेत्।

(ख) <u>धीराः</u> न्याय्यात्पथः न प्रविचलन्ति।

(ग) क्वचिदपि <u>माता</u> कुमाता न भवति।

(घ) प्रद्वेषो बहुमानो वा <u>सङ्कल्पात्</u> उपजायते।

10. **अधोलिखितानां सूक्तीनाम् अन्वयं कुरुत -**

(क) न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।

(ख) मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्।

(ग) तेजसां हि न वयः समीक्ष्यते।

(घ) सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः।

**11. अधोलिखितपदानां धातुं लकारं पुरुषं वचनं च लिखत -**

(क) भवति (ख) उत्पादयति (ग) प्रविचलन्ति

(घ) उपजायते (ङ) गच्छतु (च) करिष्यति (छ) अभवन्

**12. भावविस्तारं कुरुत -**

(क) कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।

(ख) बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।

(ग) आत्मनः प्रतिकूलानि परेषां न समाचरेत्।

(घ) न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।

(ङ) सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्।

**योग्यताविस्तारः**

- अन्यासां सूक्तीनां सङ्ग्रहणं कुरुत।
- सूक्तीनां दैनिकव्यवहारे प्रयोगः कर्त्तव्यः।